Vyakaran C-(281)

**Set No. 1**

**Question Booklet No.**

# 14P/250/5

*(To be filled up by the candidate by blue/black ball-point pen)*

**Roll No.** | | | | | | | | | |

**Roll No. (Write the digits in words)** ..............................................................

**Serial No. of OMR Answer Sheet** ..........................................

**Day and Date** ..............................................................

..........................................

**( Signature of Invigilator )**

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall ***except the Admit Card without its envelope.***
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space prvided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Queston Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more thar one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR** ***Answer Sheet*** at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages : 28**

*[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए है।]*

collegedunia
India's largest Student Review Platform

## ROUGH WORK
## रफ़ कार्य



collegedunia
India's largest Student Review Platform

# 14P/250/5

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** ***Full Marks : 450***

***समय : 2 घण्टे*** ***पूर्णाङ्क : 450***

**Note :** (1) Attempt as many questions as you can. Each question carries **3 (Three)** marks. ***One mark will be deducted for each incorrect answer.*** **Zero** mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3** (तीन) अंकों का है। *प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।* प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक *शून्य* होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**1.** 'प्रातिपदिकार्थे' त्यादिसूत्रे लिङ्गमात्राधिक्यस्योदाहरणमस्ति –

(1) उच्चैः (2) श्रीः (3) तटः (4) ज्ञानम्

**2.** 'कर्तुरीप्सिततमं कर्मे' ति सूत्रे 'कर्मे' त्यनुवृत्तौ पुनः 'कर्म' ग्रहणं किमर्थम् ?

(1) आधारनिवृत्त्यर्थम्
(2) सम्बन्धनिवृत्त्यर्थम्
(3) द्वितीयाविधानार्थम्
(4) कर्मणोऽभिधानार्थम्

**3.** 'लक्ष्म्या सेवितो हरिः' इत्यत्र 'क्त' प्रत्ययः कस्मिन्नर्थे ?

(1) कर्तरि (2) कर्मणि (3) भावे (4) अधिकरणे



collegedunia
India's largest Student Review Platform

4. 'तथायुक्तं चानीप्सितम्' इति सूत्रोक्ते 'अनीप्सितम्' इत्यत्र किम्प्रकारको नञ् ?

(1) प्रसज्यप्रतिषेधार्थक: (2) अभावार्थक:

(3) पर्युदासार्थक: (4) अल्पार्थक:

5. द्विकर्मकधातुप्रकरणे 'अर्थनिबन्धनेयं सञ्ज्ञे' त्येवं केन व्याख्यातम् ?

(1) कात्यानेन (2) काशिकाकृता (3) कैयटेन (4) पतञ्जलिना

6. 'गतिबुद्धी' त्यादिसूत्रे 'बुद्धि' शब्देन कस्य ग्रहणम् ?

(1) दृश् धातोरेव (2) ज्ञानसामान्यवाचिनाम्

(3) ज्ञानविशेषवाचिनाम् (4) ज्ञानसामान्यविशेषोभयेषाम्

7. 'अपि स्तुहि' इत्यत्र कर्मप्रवचनीयसञ्ज्ञा कस्मिन्नर्थे ?

(1) सम्भावनार्थे (2) पदार्थद्योत्ये (3) अन्ववसर्गद्योत्ये (4) समुच्चयद्योत्ये

8. 'हेतुत्वम्' भवति –

(1) क्रियामात्रविषयम् (2) द्रव्यादिसाधारणम्

(3) निर्व्यापारसाधारणम् (4) द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च

9. 'भक्ताय धारयति मोक्षं हरि:' इत्यत्र उत्तमर्ण: क: ?

(1) मोक्ष: (2) भक्त: (3) हरि: (4) उक्त: सर्वोऽपि

10. नियमपूर्वकविद्यास्वीकारार्थक: क: ?

(1) अपाय: (2) आख्याता (3) असोढ: (4) उपयोग:



collegedunia
India's largest Student Review Platform

11. 'जनिकर्तुः प्रकृतिः' इत्यत्र 'प्रकृति' शब्दः दीक्षितसम्मतः किमर्थकः ?

(1) हेतुमात्रपरः (2) उपादानपरः (3) स्वभावपरः (4) धात्वर्थपरः

12. बहिर्योगे पञ्चमीविधायकमस्ति –

(1) 'अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इतिसूत्रम्

(2) 'कार्तिक्याः प्रभृति' इति भाष्यवचनम्

(3) 'तत आरभ्य इत्यर्थ' इति कैयटवचनम्

(4) 'अप-परि-बहिरञ्चवः पञ्चम्या' इति समासविधानाज्ज्ञापकम्

13. 'धूमाद् अग्निमान्' इत्यत्र कथं पञ्चमी ?

(1) 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रात् (2) 'विभाषा' इति योगविभागात्

(3) 'अकर्तर्यृणे पञ्चमी' इति सूत्रात् (4) 'भुवः प्रभवः' इति सूत्रात्

14. 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इत्यत्र 'अन्यतरस्याम्' इत्यस्य ग्रहणं किमर्थम् ?

(1) विकल्पार्थम् (2) निषेधार्थम् (3) विभाषार्थम् (4) समुच्चयार्थम्

15. 'एधोदकस्योपस्कुरुते' इत्यत्र 'एधोदक' शब्दस्य समीचीनविग्रहोऽस्ति –

(1) एधांसि च उदकानि च (2) एधाश्च दकाश्च

(3) एधांसि च दकं च, एषां समाहारः (4) उक्तः सर्वोऽपि

16. 'उभयप्राप्तौ कर्मणी' ति सूत्रस्य फलं किम् ?

(1) कर्मणि षष्ठीविधानम् (2) कर्तरि षष्ठीप्रतिषेधः

(3) कर्तरि तृतीयाविधानम् (4) उक्तं सर्वमेव



collegedunia
India's largest Student Review Platform

17. 'न लोकाव्यये' त्यादिना कस्या: निषेध: ?

(1) कारकषष्ठ्या: (2) शेषषष्ठ्या: (3) कर्तृषष्ठ्या एव (4) कर्मषष्ठ्या एव

18. अभिव्यापकाधारस्योदाहरणमस्ति –

(1) मोक्षे इच्छास्ति (2) कटे आस्ते (3) सर्वस्मिन्नात्मास्ति (4) स्थाल्यां पचति

19. 'दन्तयोर्हन्ति कुञ्जरम्' इत्यत्र दन्तकुञ्जरयो: दीक्षितमते क: सम्बन्ध: ?

(1) संयोग: (2) अभेद: (3) समवाय: (4) तादात्म्यम्

20. 'अधिभुवि राम:' इत्यत्र 'अधि:' कस्य पर्याय: ?

(1) अधिरीश्वरपर्याय:

(2) अधि: 'स्व' शब्दपर्याय:

(3) अधिकपर्याय:

(4) सप्तमीपर्याय:

21. 'समर्थ: पदविधिरि' ति सूत्रमस्ति –

(1) अधिकारसूत्रम् (2) सञ्ज्ञासूत्रम् (3) परिभाषासूत्रम् (4) विधिसूत्रम्

22. 'पर्यभूषयत्' इत्यादौ सुबन्तस्य तिङन्तेन समास: कथम् ?

(1) 'सह सुपा' इति सूत्रेण

(2) 'कुगति प्रादय:' इत्यनेन

(3) 'सुबामन्त्रिते' इत्यत: 'सुबि' त्यनुवर्तनात्

(4) 'सहे' ति योगविभागस्येष्टसिद्ध्यर्थत्वात्

23. 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यत्र 'समास' पदेन किमभिप्रेतम् ?

(1) समसनं समास:

(2) समासविधायकशास्त्रम्

(3) प्रथमाविभक्त्यन्त:

(4) समाससंज्ञा



collegedunia.com
India's largest Student Review Platform

24. 'अपदिशम्' इत्यत्र कस्मिन्नर्थे समासः ?

(1) विभक्त्यर्थेऽव्ययीभावः

(4) समीपार्थे

(3) साकल्यार्थेऽव्ययीभावः

(4) 'अव्ययम्' इति योगविभागाद् 'अव्ययं' समर्थेन सह' इत्यर्थे

25. 'एकविभक्ति चापूर्वनिपाते' इति सूत्रे 'एकविभक्ती' त्यस्य कोऽर्थः ?

(1) विग्रहे यन्नियतविभक्तिकम्

(2) प्रथमा विभक्तिः

(3) अव्ययपदम्

(4) कारकशक्तिः

26. 'दिशयोर्मध्यम्' इति विग्रहे अव्ययीभावसमासे पञ्चम्येकवचने रूपम् भवति –

(1) अपदिशम्

(2) अपदिशात्

(3) अपदिशायाः

(4) अपदिशम्, अपदिशादित्युभयम्

27. 'पारे मध्ये षष्ठ्या वा' इति सूत्रोक्ते 'पारे मध्ये' इत्यत्रास्ति –

(1) सप्तमी विभक्तिः

(2) एकारान्तत्वनिपातनम्

(3) षष्ठी विभक्तिः

(4) सम्बोधनैकवचनम्

28. 'स्वयं क्तेन' इति सूत्रोक्तं 'स्वयम्' इति पदमस्ति –

(1) प्रथमान्तम् (2) द्वितीयान्तम् (3) तृतीयान्तम् (4) पूर्वोक्तं समस्तम्

29. 'नखैर्भिन्नः' इत्यत्र तृतीया विभक्तिरस्ति –

(1) कर्तरि (2) करणे (3) चतुर्थ्यर्थे (4) पूर्वोक्ते समस्तेऽर्थे



collegedunia
India's largest Student Review Platform

30. 'कृत्यैरधिकार्थवचने' इत्यत्र प्रयुक्तस्य 'अधिकार्थवचने' इत्यस्यार्थोऽस्ति –

(1) बह्वर्थकथनम्
(2) न्यूनार्थकथनम्
(3) स्तुतिपरकवचनम्
(4) स्तुतिनिन्दाफलकमर्थवादवचनम्

31. 'इध्मप्रव्रश्चन:' इत्यत्र समासो भवति –

(1) शेष-षष्ठीत्वात्
(2) कृद्योगषष्ठीत्वात्
(3) प्रतिपदविधानषष्ठीत्वात्
(4) निर्धारणषष्ठीत्वात्

32. 'घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह:' अत्र 'त्रिभुवनस्य विधाता' इति विग्रहे तृचो योगे कथं कर्मणि षष्ठ्या समास: ?

(1) कृद्योगषष्ठ्या
(2) 'याजकादिभिश्चे' ति षष्ठ्या
(3) शेषषष्ठ्या
(4) 'तदशिष्यं संज्ञाप्रमाणत्वादि' ति निर्देशात्

33. 'अर्द्धं नपुंसकमि' त्यत्र 'अर्द्ध' शब्द: कीदृश: ?

(1) खण्डवाची
(2) समांशवाची
(3) उभयात्मक:
(4) बह्वर्थक:

34. 'ईश्वराधीन:' इत्यत्र समासविधायकशास्त्रमस्ति –

(1) सप्तमी शौण्डै:
(2) सिद्धशुष्कपक्वबन्धैश्च
(3) कृत्यैर्ऋणे
(4) सञ्ज्ञायाम्

35. तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रस्य संख्यायास्तद्धितार्थे समासोदाहरणमस्ति –

(1) पौर्वशाल:
(2) आपरशाल:
(3) पूर्वशालाप्रिय:
(4) षाण्मातुर:



collegedunia
India's largest Student Review Platform

36. 'घनश्यामः' इत्यत्र समासविधायकशास्त्रमस्ति –

(1) कुत्सितानि कुत्सनैः (2) उपमानानि सामान्यवचनैः

(3) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (4) विशेषणं विशेष्येण बहुलम्

37. 'विशेषणं विशेष्येण बहुलम्' इत्यत्र 'बहुल' ग्रहणस्य किं प्रयोजनम् ?

(1) 'नीलोत्पलम्' इत्यत्र समासः

(2) 'नीलोत्पलम्' इत्यादौ नीलादेः पूर्वनिपातः

(3) 'रामो जामदग्न्यः' इत्यादौ समासाभावः

(4) 'नीलोत्पलम्' इत्यादावुत्पलादेः परनिपातः

38. 'महानवमी' त्यस्य विग्रहोऽस्ति –

(1) महा चासौ नवमी (2) महाँश्चासौ नवमी

(3) नवानां पूरणी नवमी, महती चासौ नवमी (4) कोऽपि नास्ति

39. 'प्रशंसावचनैश्च' इत्यत्र 'वचन' ग्रहणं किमर्थम् ?

(1) यौगिक शब्दग्रहणार्थम् (2) विशेषवचनग्रहणार्थम्

(3) लाक्षणिकशब्दग्रहणार्थम् (4) रूढ़िशब्दपरिग्रहार्थम्

40. 'युवा खलितपलिते' त्यादौ 'युवे' ति पुंलिङ्गनिर्देशात् कथं 'युवति' शब्दस्यापि परिग्रहः ?

(1) खलतिसादृश्यात् (2) सूत्रे 'जरती' त्यादिलिङ्गसादृश्यात्

(3) लिङ्गविशिष्टपरिभाषाग्रहणात् (4) समानाधिकरणत्वात्

41. 'राजान्तरमि' त्यस्य विग्रहोऽस्ति –

(1) अन्यो राजा (2) राज्ञोऽन्तरम्

(3) राजा चासौ अन्तरश्च (4) अन्तरश्चासौ राजा



collegedunia
India's largest Student Review Platform

**42.** 'चिदेव चिन्मात्रम्' इत्यत्र समासविधायकशास्त्रमस्ति –

(1) विशेषणं विशेष्येण बहुलम्
(2) मयूरव्यंसकादयश्च
(3) उपमानानि सामान्यवचनै:
(4) उपमितं व्याघ्रादिभि: सामान्याप्रयोगे

**43.** 'नलोपो नञ:' इत्यत्र नञर्थ: क: ?

(1) अभाव:
(2) अल्पता
(3) आरोपितत्वम्
(4) अप्राशस्त्यम्

**44.** 'कारिकाकृत्य' इत्यत्र 'कारिका' शब्दस्यार्थोऽस्ति –

(1) कर्त्री
(2) श्लोक:
(3) क्रिया
(4) उक्त: सर्वोऽपि

**45.** 'अच्छोद्य' इत्यत्र प्रकृति-प्रत्ययविभागोऽस्ति –

(1) अच्छ + उद्य
(2) अच्छ: + अद्य
(3) अच्छ वद् + क्त्वा
(4) अच्छ वद् + यत्

**46.** 'कुगतिप्रादय:' इत्यत्र प्रादिग्रहणं किमर्थम् ?

(1) उपसर्गसंग्रहार्थम्
(2) अगत्यर्थम्
(3) प्रादीनां गत्यर्थम्
(4) व्यर्थम्

**47.** 'रक्षोहागमलघ्वसन्देहा: प्रयोजनम्' इति भाष्यवार्त्तिकस्य 'असन्देहा:' इति पदे समासोऽस्ति –

(1) अर्थाभावेऽव्ययीभाव:
(2) अर्थाभावे नञ्तत्पुरुष:
(3) उत्तरपदलोपी बहुव्रीहि:
(4) कोऽपि नास्ति

**48.** 'नैकधा' इत्यत्र समासविधायकं शास्त्रमस्ति –

(1) सुप्सुपा
(2) नञ्
(3) नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोप:
(4) किमपि नास्ति



collegedunia.com
India's largest Student Review Platform

49. 'अहस्सर्वैकदेशसंख्यात्पुण्याच्च रात्रे:' इति सूत्रे अहर्ग्रहणं किमर्थम् ?

(1) कर्मधारयार्थम् (2) तत्पुरुषार्थम् (3) द्वन्द्वार्थम् (4) अव्ययीभावार्थम्

50. 'द्वयोरह्नो: समाहार:' इति विग्रहे भवति प्रयोग: –

(1) द्व्यहीन: (2) द्व्यह्नम् (3) द्व्यह: (4) द्व्यह्न:

51. 'महच्च तद् अन:' इति विग्रहे प्रयोगो भवति –

(1) महदन: (2) महान: (3) महानसम् (4) महच्चान:

52. 'महाँश्चासौ ब्रह्मा चे' ति विग्रहेऽशुद्ध: प्रयोगोऽस्ति –

(1) महाब्रह्म: (2) महाब्रह्मा (3) महन्ब्रह्मा (4) कोऽपि नास्ति

53. 'अष्टौ गावो यस्ये' ति विग्रहे बहुव्रीहौ 'अष्टागवम्' इति प्रयोगे समासान्तप्रत्यय: क: ?

(1) 'गोरतद्धितलुकि' इत्यनेन टच्

(2) 'अच् प्रत्यन्ववपूर्वात्' इत्यत्र 'अच्' इति योगविभागादच्

(3) 'अनोऽश्माय:सरसां जातिसंज्ञयो:' इत्यनेन टच्

(4) 'उपमानादप्राणिषु' इत्यनेन टच्

54. 'एकेन न विंशतिरि' त्यर्थे प्रयोगो न भवति –

(1) एकविंशति: (2) एकोनविंशति: (3) एकाद् न विंशति: (4) एकान्न विंशति:

55. नक्षत्रद्वन्द्वे 'तिष्यश्च पुनर्वसू चे' ति विग्रहे प्रयोगो भवति –

(1) तिष्यपुनर्वसु (2) तिष्यपुनर्वसू (3) तिष्यपुनर्वसव: (4) तिष्यपुनर्वस्वौ



collegedunia
India's largest Student Review Platform

56. 'दन्ताश्च ओष्ठौ' चेति विग्रहे भवति –

(1) दन्तौष्ठम्  (2) दन्तोष्ठाः  (3) दन्तोष्ठौ  (4) दन्तोष्ठम्

57. 'पञ्चानां तक्ष्णां समाहारः' इति विग्रहे प्रयुज्यते –

(1) पञ्चतक्षी  (2) पञ्चतक्षः  (3) पञ्चतक्षाणि  (4) पञ्चतक्ष्णः

58. शुद्धः प्रयोगोऽस्ति –

(1) आदि पचति  (2) प्रातः कमनीयम्  (3) प्रातरादि  (4) कोऽपि नास्ति

59. यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः कः ?

(1) प्रथमान्तः  (2) द्वितीयान्तः  (3) तृतीयान्तः  (4) षष्ठ्यन्तः

60. 'अनेकमन्यपदार्थे' इत्यत्र 'अनेकोक्तेः' बहूनामपि बहुव्रीहिर्यथा –

(1) चित्रगुः  (2) रूपवद्भार्यः  (3) जरद्गुः  (4) चित्राजरद्गुः

61. कर्मधारयोत्तरपदे बहुव्रीहौ भवति समस्तः प्रयोगः –

(1) चित्राजरद्गवीकः  (2) चित्राजरतीगुः  (3) चित्राजरद्गुः  (4) जरच्चित्रगुः

62. 'बह्वीभ्यो देही' त्यर्थे भवति –

(1) बहुदेहि  (2) बह्वीदेहि  (3) बहुशः  (4) बह्वीशः

63. विवाहनिबन्धनं 'पति' शब्दमाश्रित्य प्रवृत्तः 'सपत्नी' शब्दोऽस्ति –

(1) रूढः  (2) योगरूढः  (3) यौगिकः  (4) यौगिकरूढः



collegedunia
India's largest Student Review Platform

64. 'पाका भार्या यस्य सः' इत्यर्थे भवति –

(1) पाकाभार्यः (2) पाकभार्या (3) पाकभार्यः (4) पाकाभार्या

65. 'वृद्धिनिमित्तस्य च तद्धितस्ये' त्यादिसूत्रे 'निमित्त' शब्दः किम्परकः ?

(1) फलोपहितपरः (2) स्वरूपयोग्यपरः (3) उक्तोभयपरः (4) उक्तोभयाभावपरः

66. 'जातेश्च' इति सूत्रेण पुंवद्भावनिषेधः कस्य ?

(1) वार्तिकस्य (2) भाष्योक्तस्य (3) सौत्रस्यैव (4) तद्धितान्तस्य

67. 'उपदशाः' इत्यत्र 'उप' शब्दस्यार्थोऽस्ति –

(1) समीपम् (2) दूरम् (3) समीपवर्ती (4) दूरवर्ती

68. 'द्वित्राः' इत्यत्र बहुव्रीहिः कस्मिन्नर्थे ?

(1) विकल्परूप 'वा' ऽर्थे (2) संशयरूप 'वा' ऽर्थे

(3) समुच्चयार्थे (4) सर्वेषूक्तार्थेषु

69. 'तत्र तेनेदमिति सरूपे' इति सूत्रोक्त 'इति' शब्दः किमभिप्रायकः ?

(1) अन्तवचनः (2) लौकिकप्रसिद्धप्रकारवचनः

(3) शब्दपरः (4) स्वरूपपरः

70. 'अस्य मुष्टिभिः सः, तस्य मुष्टिभिश्चायम् इत्येवं परस्परं प्रहृत्य स्थितयोरिदं युद्धं प्रवृत्तम्' इति विग्रहे साधुप्रयोगोऽस्ति –

(1) मुष्टामुष्टि (2) मुष्टिमुष्टि (3) मुष्टीमुष्टि (4) मुष्टीमुष्टी





collegedunia
India's largest Student Review Platform

71. 'ओरोदि' ति वक्तव्ये 'ओर्गुण:' इति गुरुनिर्देश: किमर्थ: ?

(1) 'संज्ञापूर्वको विधिरनित्य:' इति परिभाषाज्ञापनार्थम्

(2) 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय:' इति परिभाषाज्ञापनार्थम्

(3) 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय:' इति परिभाषाज्ञापनार्थम्

(4) 'अकृतव्यूहा: पाणिनीया:' इत्येतज्ज्ञापनार्थम्

72. 'जलजाक्षी' इत्यत्र सूत्रं प्रवर्तते –

(1) 'नस्तद्धिते' इति टिलोप:

(2) 'यस्येति चे' तीकारलोप:

(3) उक्तोभे प्रवर्तेते

(4) उक्तोभे अपि न प्रवर्तेते

73. द्रुणस:' इत्यत्र नस्य णत्वविधायकशास्त्रमस्ति –

(1) अट्-कुप्वाङ् - नुम्व्यवायेऽपि

(2) रषाभ्यां नो ण: समानपदे

(3) पूर्वपदात्सञ्ज्ञायामग:

(4) ऋवर्णान्नस्य णत्वं वाच्यम्

74. 'विगता नासिका यस्ये' ति बहुव्रीहौ क: प्रयोग: ?

(1) विग्र:

(2) विनस:

(3) विनासिक:

(4) विन:

75. 'सन्दिग्धसाध्यधर्मा' इत्यत्र समासो ऽस्ति –

(1) बहव्रीहि:

(2) कर्मधारयपूर्वपदो बहुव्रीहि:

(3) कर्मधारय:

(4) बहुव्रीहिगर्भकर्मधारय:

76. 'द्वौ दन्तौ यस्य स:' = द्विदन्' इत्यनेन कीदृग् वयो गम्यते ?

(1) शैशवम्

(2) यौवनम्

(3) वार्धक्यम्

(4) अतिवार्धक्यम्



collegedunia
India's largest Student Review Platform

**77.** 'व्यूढं = विशालम् उरो यस्ये' ति विग्रहे भवति प्रयोग: –

(1) व्यूढोरस्क: (2) व्यूढोर: (3) व्यूढोरसा: (4) व्यूढोरस:

**78.** 'समाप्तं वानं = वयनक्रिया यस्ये' ति विग्रहे प्रयोग: –

(1) समाप्तवान् (2) समाप्तवानम् (3) समाप्तवान: (4) समाप्तवाना

**79.** 'सप्तमीविशेषणे बहुव्रीहौ' इति सूत्रे 'सप्तमी' ग्रहणं कस्य ज्ञापकम् ?

(1) व्यधिकरणपदबहुव्रीहे: (2) तद्गुणसंविज्ञानबहुव्रीहे:

(3) अतद्गुणसंविज्ञानबहुव्रीहे: (4) समानाधिकरणपदबहुव्रीहे:

**80.** 'द्वित्रा:' इत्यत्र कीदृशो विग्रह: ?

(1) द्वौ च त्रयश्च (2) द्वावेव त्रय: (3) द्व्यधिकास्त्रय: (4) द्वौ वा त्रयो वा

**81.** 'चार्थे द्वन्द्व:' इत्यत्र 'च' शब्दद्योत्यार्थ: क: ?

(1) इतरेतरयोग: (2) समुच्चय:

(3) अन्वाचय: (4) समुच्चयान्वाचयेतरेतरयोगसमाहारा:

**82.** समुच्चय: क: ?

(1) परस्परनिरपेक्षस्यानेकस्य एकस्मिन् अन्वय:

(2) अन्यतरस्यानुषङ्गिकत्वेनान्वय:

(3) मिलितानामन्वय:

(4) समूह:



collegedunia
India's largest Student Review Platform

83. अन्वाचयस्योदाहरणमस्ति –

(1) धवखदिरौ (2) संज्ञापरिभाषम्

(3) ईश्वरं गुरुं च भजस्व (4) भिक्षामट गां चानय

84. 'होता च पोता च नेष्टा च उद्गाता च' इति विग्रहे द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे कीदृशः प्रयोगः ?

(1) होतृपोतृनेष्टोद्गातारः (2) होतृपोतानेष्टोद्गातारः

(3) होतापोतानेष्टोद्गातारः (4) होतापोतृनेष्टोद्गातारः

85. 'इन्द्रश्च अग्निश्च' इति विग्रहे इतरेतरयोगद्वन्द्वे समस्तप्रयोगो भवति –

(1) इन्द्राग्नी (2) अग्नीन्द्रौ

(3) अग्नीन्द्रम् (4) इन्द्राग्नि

86. 'शिशिरश्च हेमन्तश्च वसन्तश्च' इति विग्रहे इतरेतरयोगद्वन्द्वे कः प्रयोगः ?

(1) शिशिरहेमन्तवसन्ताः (2) वसन्तशिशिरहेमन्ताः

(3) शिशिरवसन्तहेमन्ताः (4) हेमन्तशिशिरवसन्ताः

87. 'क्षत्रियश्च ब्राह्मणश्च शूद्रश्च वैश्यश्चे' ति विग्रहे इतरेतरयोगद्वन्द्वे कः प्रयोगः ?

(1) क्षत्रियब्राह्मणशूद्रवैश्याः (2) ब्राह्मणक्षत्रियशूद्रवैश्याः

(3) ब्राह्मणक्षत्रियवैश्यशूद्राः (4) शूद्रवैश्यक्षत्रियब्राह्मणाः

88. 'रथिकाश्च अश्वारोहाश्च, तेषां समाहारः' इत्यर्थे कः प्रयोगः ?

(1) रथिकाश्वारोहाः (2) अश्वारोहरथिकाः (3) रथिकाश्वारोहम् (4) रथिकाश्वारोहाणि



collegedunia
India's largest Student Review Platform

89. 'अनुवादे चरणानाम्' इति सूत्रस्य समाहारद्वन्द्वोक्तम् उदाहरणमस्ति –

(1) अर्काश्वमेधम् (2) मार्दङ्गिकपाणविकम्

(3) कुरुकुरुक्षेत्रम् (4) उद्गात् कठकालापम्

90. 'अध्वर्युक्रतुरनपुंसकम्' इत्यत्र प्रयुक्तोऽध्वर्युशब्दलक्षितः कः ?

(1) ऋग्वेदः (2) यजुर्वेदः (3) सामवेदः (4) अथर्ववेदः

91. 'पदक्रमकम्' इत्यत्र द्वन्द्वे एकवद्भावविधायकं शास्त्रं किम् ?

(1) अनुवादे चरणानाम् (2) जातिरप्राणिनाम्

(3) अध्ययनतोऽविप्रकृष्टाख्यानम् (4) स्थेणोर्लुङीति वक्तव्यम्

92. 'जातिरप्राणिनाम्' इति सूत्रे किमात्मिका जातिर्गृह्यते ?

(1) द्रव्यजातिः (2) गुणजातिः (3) क्रियाजातिः (4) द्रव्यगुणक्रियाजातयः

93. अत्र समाहारद्वन्द्वप्रयोगेषु व्यञ्जनवाचिनाम् उदाहरणं किमस्ति ?

(1) व्रीहियवम् (2) दधिघृतम् (3) कुशकाशम् (4) पूर्वापरम्

94. 'विप्रतिषिद्धं चानधिकरणवाचि' इति सूत्रे 'अनधिकरण' पदान्तर्गतस्य 'अधिकरण' शब्दस्य कोऽर्थः ?

(1) आधारः (2) अधिकारः (3) द्रव्यम् (4) गुणः

95. 'अग्निश्च सोमश्चे' तीतरेतरयोगद्वन्द्वे कः प्रयोगः साधुः ?

(1) अग्निसोमौ (2) अग्नीसोमौ (3) अग्निषोमौ (4) अग्नीषोमौ



collegedunia
India's largest Student Review Platform

96. उदीचां मते 'माता च पिता च' इति विग्रहे इतरेतरयोगद्वन्द्वे किं सेत्स्यति ?

(1) मातापितरौ (2) मातुपितरौ (3) मातरपितरौ (4) मातारपितरौ

97. 'वाक् च त्विट् चे' ति विग्रहे समाहारद्वन्द्वे रूपम्भवति –

(1) वाक्त्विटम् (2) वाक्त्विषम् (3) वाच्त्विषम् (4) वाक्त्विडम्

98. शाश्वतिकविरोधे समाहारद्वन्द्वस्योदाहरणमस्ति –

(1) काकोलूकम् (2) गोमहिषम् (3) रूरूपृषतम् (4) कुशकाशम्

99. 'चार्थे द्वन्द्वः' इत्यत्र चार्थेषु कुत्र समासाभावः ?

(1) इतरेतरयोगे (2) समाहारे

(3) केवलसमुच्चये (4) समुच्चयान्वाचययोः

100. 'जाया च पतिश्चे' ति विग्रहे इतरेतरयोगद्वन्द्वे कानि रूपाणि ?

(1) जायापती एव (2) जम्पती एव (3) दम्पती एव (4) पूर्वोक्तानि सर्वाणि

101. 'तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते' इति वैयाकरण भूषणकारिकोक्तेन 'तत्र' शब्देन किं संकेतितम्।

(1) महाभाष्यम् (2) शब्दकौस्तुभः (3) अष्टाध्यायी (4) काशिकावृत्तिः

102. *तिङ्वाच्यौ कौ ?*

(1) कर्म एव (2) कर्तैव (3) फलव्यापारौ (4) कर्मकर्तारौ



collegedunia
India's largest Student Review Platform

103. फलव्यापारयो: विशेषणे के ?

(1) कर्तृकरणे

(2) कालकर्मणी

(3) फलव्यापारयो: विशेषणे क्रमश: कर्म कर्ता च

(4) पूर्वोक्तं किमपि नास्ति

104. धातो: कुत्र शक्ति: ?

(1) फल एव
(2) व्यापार एव
(3) फलावच्छिन्नव्यापारे
(4) फले व्यापारे च पृथक् शक्ति:

105. फलं कीदृशम् अभिप्रेतम् ?

(1) यदुद्देशेन क्रियाप्रवृत्तिरूपं लौकिकम्
(2) विक्लित्त्यादिरूपं पारिभाषिकम्
(3) वृक्षादिजन्यम्
(4) हेतुरूपम्

106. 'व्यापार' पदार्थ: क: प्रोक्त: भूषणसारे ?

(1) तज्जन्यत्वे सति तज्जन्यजनक:
(2) सिद्धा क्रिया
(3) भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया
(4) उक्तेषु कोऽपि नास्ति

107. क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं किम् अभिहितम् ?

(1) साध्यत्वम्
(2) सिद्धत्वम्
(3) फलत्वम्
(4) धातुत्वम्

108. असत्त्वभूतो भाव: क: पदार्थ: ?

(1) सिद्धा क्रिया
(2) साध्या क्रिया
(3) कृदन्त क्रिया
(4) उक्तेषु कोऽपि नास्ति



collegedunia
India's largest Student Review Platform

109. कर्तृकर्मणोराख्यातार्थत्वे भूषणकृता किम्मानं दर्शितम् ?

(1) 'भावे' इति सूत्रम्

(2) 'कर्तरि कृद्' इति सूत्रम्

(3) 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रम्

(4) 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रम्

110. मीमांसकानां मते धात्वर्थः कः ?

(1) भावना

(2) फलावच्छिन्ना भावना

(3) फलम्

(4) भावना फलं च

111. 'आख्यातार्थसंख्याप्रकारकबोधम्प्रति आख्यातजन्य – कर्तृकर्मोपस्थितिर्हेतुः' इति कार्यकारणभावः कस्य मते ?

(1) नैयायिकमते (2) मीमांसकमते (3) वैयाकरणमते (4) नव्यमीमांसकमते

112. तिङर्थेः कालः कस्मिन् विशेषणम् ?

(1) व्यापारे (2) फले (3) कर्मणि (4) कर्तरि

113. धात्वर्थफलव्यापारयोः व्यापारस्यैव प्राधान्ये किम्प्रमाणम् ?

(1) प्रकृतिप्रत्ययार्थयोः प्रत्यार्थस्यैव प्राधान्यम्

(2) 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति निरुक्त वचनम्

(3) वर्तमाने लट्

(4) कर्तरि कृत्



collegedunia
India's largest Student Review Platform

114. 'भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थिति: कारणम्' इति कार्यकारणभावं को वदति ?

(1) वैयाकरण:
(2) प्राभाकरमीमांसक:
(3) नैयायिक:
(4) भाट्टमीमांसक:

115. फलान्वय्याश्रयस्य द्योतका: के ?

(1) शप्
(2) श्नम्
(3) तिबादि:
(4) तङ्यक्चिणादय:

116. नैयायिकानां मते लकारस्य कुत्र शक्ति: ?

(1) कर्तरि
(2) कर्मणि
(3) कृतौ
(4) भावनायाम्

117. 'स्वार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्' इत्यत्र 'स्वार्थ' घटक 'स्व' पदेन किं ग्राह्यम् ?

(1) धातु:
(2) तिङ्
(3) प्रत्यय:
(4) तङ्

118. भूषणकृन्मते कृञ्धातोरर्थ: क: ?

(1) यत्न:
(2) उत्पत्तिरूपफलानुकूलो यत्न:
(3) उत्पत्ति:
(4) भावना

119. क्रियाकृतविशेषानुपलभ्यमानत्वम् कर्मास्ति –

(1) निर्वर्त्यम्
(2) विकार्यम्
(3) प्राप्यम्
(4) उदासीनम्

120. कर्मवद्भाव: कस्मिन् कर्मणि निगदित: ?

(1) केवलनिर्वर्त्ये
(2) केवलविकार्ये
(3) प्राप्ये
(4) निर्वर्त्ये विकार्ये च



collegedunia India's largest Student Review Platform

**121.** धातुत्वलक्षणं किम् ?

(1) क्रियावाचकत्वम् एव
(2) गणपठितत्वम् एव
(3) भावप्रत्ययार्थबोधकत्वम्
(4) क्रियावाचकत्वे सति भ्वादिगणपठितत्वम्

**122.** 'फलव्यापारयोरेकनिष्ठतायामि' त्यादिकारिकांशोक्तस्य 'एकनिष्ठातायामि' त्यस्य कोऽर्थः ?

(1) समानाधिकरणवृत्तितायाम्
(2) भिन्नाधिकरणवृत्तितायाम्
(3) फलव्यापारयोर्भिन्नाधिकरणावृत्तितायाम्
(4) समानाधिकरणभिन्नाधिकरणवृत्तितायाम्

**123.** कृदन्तस्थले तिङोऽभावात् कीदृशो बोधः ?

(1) सिद्धक्रियाया एव
(2) साध्यक्रियाया एव
(3) धातुरूपनिबन्धना साध्या घञादिनिबन्धना च सिद्धा
(4) घञादिनिबन्धनापि साध्या

**124.** 'स्तोकं पाकः' इत्यनेन किमवगम्यते ?

(1) धात्वर्थः फलमिति
(2) घञर्थः साध्या क्रियेति
(3) धात्वर्थः क्रिया, अतः 'क्रियाविशेषणानां कर्मत्वम्' इत्यस्य प्रवृत्तिः
(4) धात्वर्थः सिद्धा क्रियेति

**125.** सुबर्थेषु आश्रयोऽर्थः कासां विभक्तीनाम् ?

(1) प्रथमा - द्वितीया - चतुर्थीनाम्
(2) द्वितीया - चतुर्थी - षष्ठीनाम्
(3) पञ्चमी - प्रथमा - चतुर्थीनाम्
(4) द्वितीया - तृतीया - सप्तमीनाम्



collegedunia
India's largest Student Review Platform

126. क्रियाजन्यसंयोगरूपफलस्य कर्तृकर्मणोरुभयत्र सत्त्वेऽपि 'चैत्रश्चैत्रं गच्छती' ति प्रयोगापत्तिः कथन्न भवति ?

(1) तदीय-कर्तृसञ्ज्ञया कर्मसञ्ज्ञायाः बाधात् (2) करणसंज्ञया कर्मसंज्ञायाः बाधात्

(3) सम्प्रदानसंज्ञया कर्मसंज्ञायाः बाधात् (4) अधिकरणसंज्ञया कर्मसंज्ञायाः बाधात्

127. सुबर्थनिर्णये धात्वर्थव्यापारजन्यफलाश्रयरूपं कर्म कतिविधं दर्शितम् ?

(1) त्रिविधम् (2) पञ्चविधम् (3) चतुर्विधम् (4) सप्तविधम्

128. 'क्रूरमभिक्रुध्यती' ति यस्य कर्मण उदाहरणमास्ति तदस्ति –

(1) संज्ञान्तरैरनाख्यातम् (2) औदासीन्येन प्राप्तम्

(3) अन्यपूर्वकम् (4) अनीप्सितम्

129. तृतीयार्थत्वेनोक्तः कर्ता कतिविधः ?

(1) द्विविधः (2) त्रिविधः (3) चतुर्विधः (4) एकविधः

130. कर्मकर्तुरुदाहरणमस्ति –

(1) मया हरिः सेव्यते (2) कार्यते हरिणा (3) गमयति कृष्णं गोकुलम् (4) किमपि नास्ति

131. सुबर्थप्रकरणे अपादानं कतिविधं प्रोक्तम् ?

(1) द्विविधम् (2) त्रिविधम् (3) चतुर्विधम् (4) पञ्चविधम्

132. उपात्तविषयापादानस्योदाहरणमस्ति –

(1) अश्वात् पतति (2) ग्रामादायाति

(3) कुतो भवान्, पाटलिपुत्रात् (4) बलाहकाद् विद्योतते



collegedunia
India's largest Student Review Platform

133. सम्प्रदानं कतिविधम् ?

(1) एकविधम् (2) द्विविधम् (3) त्रिविधम् (4) चतुर्विधम्

134. अनिराकारणहेतुकसम्प्रदानस्योदाहरणं वर्तते –

(1) सूर्याय अर्घ्यं ददाति (2) विप्राय गां ददाति

(3) उपाध्यायाय गां ददाति (4) उक्तं सर्वम्

135. 'रजकाय वस्त्रं ददाती' ति को मनुते ?

(1) कौण्डभट्ट: (2) वृत्तिकार: (3) भट्टोजिदीक्षित: (4) वरदराज:

136. 'सप्तमी-पञ्चम्यौ कारकमध्ये' इति सूत्रे 'शक्ति: कारकम्' इति पक्षस्य भाष्ये दर्शनात् किमूह्यम् ?

(1) शेषषष्ठ्या: सम्बन्धमात्रम् अर्थ: (2) कृद्योगषष्ठ्या: कारकत्वशक्तिरर्थ:

(3) शेषषष्ठ्या: समास: (4) कारकषष्ठ्या: न समास:

137. प्रत्ययनियमोऽर्थनियमश्च कुत्र मन्येते ?

(1) सुप्सु एव (2) तिङ्क्षु एव

(3) सुप्सु तिङ्क्षु च (4) सुप्सु तिङ्क्षु कृत्सु च

138. नामार्थानां शास्त्रे निरूपिता: सर्वेऽपि पक्षा: कति ?

(1) एकम् (2) द्विकम् (3) त्रिकम् (4) पञ्चकम्

139. नामार्थप्रकरणे 'एकम्' इत्यनेन किं विवक्षितम् ?

(1) व्यक्ति: (2) लिङ्गम् (3) जाति: (4) संख्या



collegedunia
India's largest Student Review Platform

140. नामार्थप्रकरणे 'द्विकम्' इत्यनेन किं दर्शितम् ?

(1) जातिर्लिङ्गं च (2) जातिव्यक्ती (3) जातिः संख्या च (4) लिङ्गसंख्ये

141. सत्त्व-रजस्तमोगुणानां साम्यावस्थोच्यते –

(1) पुंस्त्वम् (2) पुंस्त्वम् स्त्रीत्वं च (3) स्त्रीत्वं नपुंसकत्वं च (4) नपुंसकत्वम्

142. सत्त्वादिगुणानामुपचयः कथ्यते –

(1) स्त्रीत्वम् (2) नपुंसकत्वम् (3) पुंस्त्वम् (4) स्त्रीत्वं पुंस्त्वं च

143. 'दधि पश्यती' त्यादौ लिङ्गादित्रिकं कस्यार्थः ?

(1) प्रकृत्यार्थः (2) प्रत्ययार्थः (3) प्रकृतिप्रत्यययोरर्थः (4) क्रियार्थः

144. 'द्योतिका वाचिका वा स्युरि' त्यादिना वाक्यपदीये किं व्युत्पादितम् ?

(1) विभक्तीनां द्योतकतापक्षे संख्याकारकयोः प्रत्ययार्थत्वम्

(2) विभक्तीनां वाचकतापक्षे संख्याकारकयोः नामार्थत्वम्

(3) संख्याकारकविषये नामार्थत्वं प्रत्ययार्थत्वं वेति पक्षद्वयम्

(4) संख्याकारकयोर्नैव प्रकृत्यर्थत्वं नापि प्रत्ययार्थत्वम्

145. शब्दोऽपि नामार्थत्वेन कुत्राङ्गीक्रियते ?

(1) 'गावमुच्चायरे' त्यादिभाषाशब्दानामनुकरणे (2) काव्ये

(3) नाट्ये (4) वेदे

146. 'ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा' इत्यादिवाक्यपदीयकारिकया किमवबोधितम् ?

(1) सम्बन्धस्यैकनिष्ठत्वम् (2) ग्राह्यत्वमेव शक्तिर्न ग्राहकत्वम्

(3) ग्राहकत्वमेव शक्तिर्न ग्राह्यत्वम् (4) ग्राह्यत्व-ग्राहकत्वरूपे द्वे अपि शक्ती





collegedunia.com
India's largest Student Review Platform

147. 'जातिरेव नामार्थः' इति पक्षे 'जाति' शब्देन किमुच्यते ?

(1) नित्यत्वे सति अनेकसमवेतत्वम्
(2) तत्तत्पदार्थगतासाधारणो धर्मः
(3) जन्म
(4) पूर्वोक्तं सर्वम्

148. 'काष्ठं भस्म करोती' ति कस्योदाहरणम् ?

(1) निर्वर्त्य कर्मणः
(2) गुणान्तरोत्पत्तिरूपस्य विकार्यकर्मणः
(3) प्रकृत्युच्छेदसम्भूतरूपस्य विकार्यकर्मणः
(4) प्राप्यकर्मणः

149. 'घटं पश्यती' त्यत्र किं विधं कर्म ?

(1) द्वेष्यम्
(2) अनीप्सितम्
(3) प्राप्यम्
(4) निर्वर्त्यम्

150. वैयाकरणैः कीदृशो वादः स्वीक्रियते ?

(1) सत्कार्यवादः
(2) असत्कार्यवादः
(3) सदसत्कार्यवादः
(4) न कोऽपि





collegedunia
India's largest Student Review Platform

ROUGH WORK

रफ कार्य



collegedunia
India's largest Student Review Platform

# अभ्यर्थियों के लिए निर्देश

*(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)*

1. प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।
2. परीक्षा भवन में *लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,* लिखा या सादा कोई भी खुला कागज साथ में न लायें।
3. *उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।*
4. अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।
5. *उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।*
6. *ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।*
7. *उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।*
8. *प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।*
9. प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।
10. *ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।*
11. रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।
12. परीक्षा के उपरान्त *केवल ओ एम आर उत्तर-पत्र* परीक्षा भवन में जमा कर दें।
13. परीक्षा समाप्त होने से पहले परीक्षा भवन से बाहर जाने की अनुमति नहीं होगी।
14. यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।

collegedunia
India's largest Student Review Platform